10·3

# श्रीश्रीशंकराचार्यस्तोत्रावली

—:(*):—

भव शंकर देशिक मे शरणम्



श्रीशंकर मठ, काँको

धनबाद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# श्रीश्रीशंकराचार्य स्तोत्रावली

—×—

भव शंकर देशिक मे शरणम्

श्रीशंकर मठ, काँको, धनबाद

( माकरी सप्तमी १९८४ )

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

* प्रकाशक :
काँकोश्रीशंकरमठस्थित
श्रीशङ्कर ग्रन्थालय ( प्रकाशन विभाग )


* मुद्राकर :
देवाशीष प्रेस
दूर्गादास पाण्डा
७१न० कैलास बोस ष्ट्रीट
कलिकाता-६

प्राप्तिस्थान :
* श्रीशंकरमठ, काँको
डाः—काँकोमठ
जिला—धानबाद ( विहार )

* श्रीशंकरमठ, वाराणसी
वि ८।१९, वड़ागंभीर सिंह
वाराणसी, उत्तरप्रदेश।

* श्रीजगन्नाथ योगालय
डाः तिलवाराघाट
जिला—जबलपुर, ( मध्यप्रदेश )

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



भव शंकर देशिक मे शरणम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# भगवत्पादश्रीशंकराचार्याष्टोत्तर शतनामावली स्तोत्रम् ।

शंकराचार्यवर्यो हि ब्रह्मानन्दप्रदायकः ।
अज्ञान-तिमिरादित्यः सुज्ञानाम्बुधिचन्द्रमाः ॥
वर्णाश्रम-प्रतिष्ठाता श्रीमान् मुक्तिप्रदायकः ।
शिष्योपदेश-निरतो भक्ताभीष्ट-प्रदायकः ॥
सूक्ष्मतत्त्व-रहस्यज्ञः कार्याकार्य-प्रबोधकः ।
ज्ञान-मुद्राङ्कितकरः शिष्यहृत्तापहारकः ॥
पारिव्राज्यसमुद्धर्ता सर्व्वतन्त्रस्वतन्त्रधीः ।
अद्वैतस्थापनाचार्यः साक्षात् शंकररूपभृत् ॥
षण्मतस्थापनाचार्यः त्रयीमार्गप्रकाशकः ।
वेदवेदाङ्गतत्त्वज्ञो दुर्वादिमतखण्डनः ॥
वैराग्यनिरतः शान्तः संसारार्णवतारकः ।
प्रसन्नवदनाम्भोजः परमार्थप्रकाशकः ॥
पुराणस्मृतिसारज्ञो नित्यतृप्तो महामुनिः ।
नित्यानन्दो निरातङ्को निःसङ्गो निर्म्मलात्मकः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निर्ममो निरहङ्कारो विश्ववन्द्य-पदाम्बुजः ।
सत्यप्रधानः सद्भावः संख्यातीतगुणोज्ज्वलः ॥
अनघः सारहृच्चैव सुधीः सारस्वतप्रदः ।
सत्यात्मा पुण्यशीलश्च सांख्ययोग विचक्षणः ॥
तपोराशिर्महातेजा गुणत्रयविभागवित् ।
कलिघ्नः कालकर्म्मज्ञस्तमोगुणनिवारकः ॥
भगवान् भारतीजेता शारदाह्वानपण्डितः ।
धर्म्माधर्म्मविधानज्ञो लक्ष्यभेदप्रदर्शकः ॥
नादविन्दु-कलाभिज्ञो योगिहृत्पद्मभास्करः ।
अतीन्द्रियज्ञाननिधिर्नित्यानित्यविवेकवान् ॥
चिदानन्दश्चिन्मयात्मा परकायप्रवेशकृत् ।
अमानुष-चरित्राढ्यः क्षेमदायी क्षमाकरः ॥
भव्यो भद्रप्रदश्चैव भूरिमहिमसंयुतः ।
विश्वरंजकनामासौ नित्यानन्दसमन्वितः ॥
स्वप्रकाशः सदाधारः सच्चिदानन्दविग्रहः ।
ब्रह्मविद्या-सुतृप्तात्मा शिष्यसंतापनाशकः ॥
विश्वबन्धुर्देशिकेन्द्रो विश्ववन्द्यः शुभोदयः ।
विशालकीर्त्तिर्वागीशः सर्वलोक-हितोत्सुकः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कैलाशभ्रमण-प्राप्त-चन्द्रमौलिप्रपूजकः ।
काञ्च्यां श्रीचक्रराजाख्ययन्त्रस्थापनदीक्षितः ॥
श्रीचक्रात्मकताटङ्क-तोषिताम्बा-मनोरथः ।
ब्रह्मसूत्रमहावाक्य-सद्भाष्यादि-प्रकल्पकः ॥
चतुर्दिक् चतुराम्नाय-प्रतिष्ठाता महामतिः ।
द्विसप्ततिमतोच्छेत्ता सर्व्वदिग्विजयप्रभुः ॥
काषायवसनोपेतो भस्मोद्धूलितविग्रहः ।
ज्ञानात्मकैकदण्डाढ्यः कमण्डलु-लसत्करः ॥
गुरुभूमण्डलाचार्यो भगवत्पाद-संज्ञकः ।
व्यास-सन्दर्शन-प्रीत ऋष्यशृङ्गपुरेश्वरः ॥
सौन्दर्यलहरीमुख्य-बहुस्तोत्र-विधायकः ।
चतुःषष्टिकलाभिज्ञो ब्रह्मराक्षसतोषकः ॥
मण्डनमिश्रसंख्येय-स्वयम्भूजय-संनुतः ।
तोटकाचार्य-सम्पूज्यः पद्मपादार्चिताङ्घ्रिकः ॥
हस्तामलकयोगीन्द्र-ब्रह्मज्ञान-प्रदायकः ।
सुरेश्वराख्य-सच्छिष्य-सन्न्यासाश्रमदायकः ॥
नृसिंहभक्तः सद्रत्नगर्भहेरम्बपूजकः ।
व्याख्यासिंहासनाधीशो जगत्पूज्यो जगद्गुरुः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वलोकगुरुः साक्षात् सर्वलोकाभिवन्दितः ।
धर्मसंस्थापकश्चैव शंकरो लोकशंकरः ॥

* * * *

पश्चिमाम्नाय-सम्प्राप्तामष्टोत्तरशताभिधाम् ।
दृष्ट्वा नामावलीं भिक्षुर्योजयामास छन्दसा ॥
छन्दोऽनुरोधतः क्वापि पदानि योजितानि च ।
क्वापि संज्ञा-प्रधानत्वाल्लघ्वादिकं विलंघितम् ॥
भगवत्पादपूजार्थं रचितं भक्तिभावतः ।
श्रीजगन्नाथशिष्येण हृषीकेशाख्यभिक्षुणा ॥

श्रीशंकर पञ्चमी
१९८३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# तोटकाष्टकम्

(१)

विदिताखिल शास्त्र-सुधाजलधे
महितोपनिषत् कथितार्थनिधे ।
हृदये कलये विमलं चरणं
भव शंकर देशिक मे शरणम् ॥

(२)

करुणा-वरुणालय पालय मां
भवसागर-दुःख-विदून-हृदम् ।
रचयाखिलदर्शनतत्त्वविदं
भव शंकर देशिक मे शरणम् ॥

(३)

भवता जनता सुहिता भविता
निजबोधविचारणचारुमते ।
कलयेश्वर-जीवविवेकविदं
भव शंकर देशिक मे शरणम् ॥

(४)

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं
भव शंकर देशिक मे शरणम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(५)

सुकृतेऽधिकृते बहुधा भवतो
भविता समदर्शनलालसता ।
अतिहीनमिमं परिपालय मां
भव शंकर देशिक मे शरणम् ॥

(६)

जगतीमवितुं कलिताकृतयो
विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो
भव शंकर देशिक मे शरणम् ॥

(७)

गुरुपुंगव पुंगवकेतन ते
समतामयतां न हि कोऽपि सुधीः ।
शरणागत-वत्सल तत्त्वनिधे
भव शंकर देशिक मे शरणम् ॥

(८)

विदिता न मया विशदैककला
न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां
भव शंकर देशिक मे शरणम् ॥

इति जगद्गुरु श्रीश्रीमच्छंकराचार्यशिष्यतोटकाचार्य-
विरचितं तोटकाष्टकं सम्पूर्णम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# श्रीशंकराचार्यभुजंगप्रयाताष्टकम्

(१)

सपत्नीक-विप्रेन्द्र-भक्तिप्रकाशं
नवादित्य-संकाशमन्तर्विकाशम् ।
धराभारसंहारकं देवदेवं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

(२)

श्रुतिप्रोक्त-सद्धर्मरक्षावतारं
महामोह-सन्दोह–सन्तापहारम् ।
जगद्वन्द्यपादं सदाद्वैतवादं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

(३)

त्रितापाग्निदग्धाकुलान् जीवसंघान्
कृपासारधाराभि-संप्लावयन्तम् ।
क्षमा-मंडनं मंडनाचार्य-पूज्यं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(४)

जगन्मङ्गलं ज्ञान-विज्ञानतृप्तं
गुणातीतमद्वैततत्त्व-प्रदीप्तम् ।
प्रसन्नं प्रकृष्टं शरण्यं गरिष्ठं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

(५)

महावाक्य-पीयूष-दाने प्रदक्षं
विनेयाभिसन्तापनाशे सुदक्षम् ।
प्रसन्नाम्बुजाक्षं सदा मे समक्षं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

(६)

प्रपन्नार्त्त-हृद्ध्वान्तनाशे प्रदान्तं
प्रसन्नाभिसौम्यातिसौम्यं प्रशान्तम् ।
चिदानन्द-सन्मात्रमूर्त्तिं सुकान्तं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(७)

श्रुतेर्भाष्य-भासा समुद्भासयन्तं
विपक्षान् स्वपक्षान् सदा कारयन्तम् ।
स्वशिष्यान् सुयोग्यान् मुदा बोधयन्तं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

(८)

चतुर्वेदरूपान् स्वरूपान् स्वशिष्यान्
सुरेशाब्जपादादिसंज्ञान् वरिष्ठान् ।
चतुर्दिक्षु संस्थापयन्तं शरण्यं
भजे शंकरं देशिकेन्द्रं वरेण्यम् ॥

(९)

श्रीशंकराष्टकं पुण्यं हृषीकेश-प्रकल्पितम् ।
राजतां देशिकेन्द्रस्य कोमले चरणाम्बुजे ॥

इति श्रीजगन्नाथाश्रम-पूज्यपाद-शिष्य-श्रीहृषीकेशाश्रम
विरचितं श्रीशंकराचार्य्य-भुजङ्गप्रयाताष्टकं सम्पूर्णम् ।

१८-९-८३.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# श्रीश्रीगुरुपरम्परावन्दना

नारायणं पद्मभुवं वशिष्ठं शक्तिं च तत्पुत्रपराशरञ्च ।
व्यासं शुकं गौड़पादं महान्तम् ।
गोविन्द-योगीन्द्रमथास्य शिष्यं श्रीशंकराचार्य्य-
मथास्य पद्मपादं हस्तामलकञ्च शिष्यम् ।
तं तोटकं वार्त्तिककारमन्यानस्मद्गुरून्
सन्ततमानतोऽस्मि ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शंकरं लोकशंकरम् ॥
सदाशिवसमारम्भां शंकराचार्य्यमध्यमाम् ।
अस्मदाचार्य्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# श्रीभगवत्पादशंकराचार्याष्टोत्तरशतनामार्चनमाला

१—श्रीशंकराचार्यवर्याय नमः ।

२—श्रीब्रह्मानन्द-प्रदायकाय नमः ।

३—श्रीअज्ञानतिमिरादित्याय नमः ।

४—श्रीसुज्ञानाम्बुधि-चन्द्रमसे नमः ।

५—श्रीवर्णाश्रमप्रतिष्ठात्रे नमः ।

६—श्रीमते नमः ।

७—श्रीमुक्तिप्रदायकाय नमः ।

८—श्रीशिष्योपदेशनिरताय नमः ।

९—श्रीभक्ताभीष्टप्रदायकाय नमः ।

१०—श्रीसूक्ष्मतत्त्वरहस्यज्ञाय नमः ।

११—श्रीकार्याकार्यप्रबोधकाय नमः ।

१२—श्रीज्ञानमुद्रांकितकराय नमः ।

१३—श्रीशिष्यहृत्तापहारकाय नमः ।

१४—श्रीपारिव्राज्याश्रमोद्धर्त्रे नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१५—श्रीसर्वतन्त्रस्वतन्त्रधियै नमः ।

१६—श्रीअद्वैतस्थापनाचार्याय नमः ।

१७—श्रीसाक्षात्शंकररूपभृते नमः ।

१८—श्रीषण्मतस्थापनाचार्याय नमः ।

१९—श्रीत्रयीमार्गप्रकाशाय नमः ।

२०—श्रीवेदवेदांगतत्त्वज्ञाय नमः ।

२१—श्रीदुर्वादिमतखंडनाय नमः ।

२२—श्रीवैराग्यनिरताय नमः ।

२३—श्रीशांताय नमः ।

२४—श्रीसंसारार्णवतारकाय नमः ।

२५—श्रीप्रसन्नवदनाम्भोजाय नमः ।

२६—श्रीपरमार्थप्रकाशकाय नमः ।

२७—श्रीपुराणस्मृतिसारज्ञाय नमः ।

२८—श्रीनित्यतृप्ताय नमः ।

२९—श्रीमहामुनये नमः ।

३०—श्रीनित्यानन्दाय नमः ।

३१—श्रीनिरातंकाय नमः ।

३२—श्रीनिःसंगाय नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३३—श्रीनिर्मलात्मकाय नमः ।

३४—श्रीनिर्ममाय नमः ।

३५—श्रीनिरहंकाराय नमः ।

३६—श्रीविश्ववन्द्यपदाम्वुजाय नमः ।

३७—श्रीसत्यप्रधानाय नमः ।

३८—श्रीसद्भावाय नमः ।

३९—श्रीसंख्यातीतगुणोज्ज्वलाय नमः ।

४०—श्रीअनघाय नमः ।

४१—श्रीसारहृदयाय नमः ।

४२—श्रीसुधये नमः ।

४३—श्रीसारस्वतप्रदाय नमः ।

४४—श्रीसत्यात्मने नमः ।

४५—श्रीपुण्यशीलाय नमः ।

४६—श्रीसांख्ययोगविचक्षणाय नमः ।

४७—श्रीतपोराशये नमः ।

४८—श्रीमहातेजसे नमः ।

४९—श्रीगुणत्रयविभागविदे नमः ।

५०—श्रीकलिघ्नाय नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५१—श्रीकालकर्मज्ञाय नमः ।

५२—श्रीतमोगुणनिवारकाय नमः ।

५३—श्रीभगवते नमः ।

५४—श्रीभारतीजेत्रे नमः ।

५५—श्रीशारदाह्वानपंडिताय नमः ।

५६—श्रीधर्माधर्मविधानज्ञाय नमः ।

५७—श्रीलक्ष्यभेदप्रदर्शकाय नमः ।

५८—श्रीनादबिंदुकलाभिज्ञाय नमः ।

५९—श्रीयोगिहृत्पद्मभास्कराय नमः ।

६०—श्रीअतीन्द्रियज्ञाननिधये नमः ।

६१—श्रीनित्यानित्यविवेकवते नमः ।

६२—श्रीचिदानन्दाय नमः ।

६३—श्रीचिन्मयात्मने नमः ।

६४—श्रीपरकायप्रवेशकृते नमः ।

६५—श्रीअमानुषचरित्राढ्याय नमः ।

६६—श्रीक्षेमदायिने नमः ।

६७—श्रीक्षमाकराय नमः ।

६८—श्रीभव्याय नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६९—श्रीभद्रप्रदाय नमः ।

७०—श्रीभूरिमहिम्ने नमः ।

७१—श्रीविश्वरंजकाय नमः ।

७२—श्रीस्वप्रकाशाय नमः ।

७३—श्रीसदाधाराय नमः ।

७४—श्रीविश्वबंधवे नमः ।

७५—श्रीशुभोदयाय नमः ।

७६—श्रीविशालकीर्तये नमः ।

७७—श्रीवागीशाय नमः ।

७८—श्रीसर्वलोकहितोत्सुकाय नमः ।

७९—श्रीकैलाशयात्रासंप्राप्तचन्द्रमौलिप्रपूजकाय नमः ।

८०—श्रीकाञ्च्यांचक्रराजाख्ययंत्रस्थापनदीक्षिताय नमः ।

८१—श्रीचक्रात्मकताटंकतोषिताम्बामनोरथाय नमः ।

८२—श्रीब्रह्मसूत्रोपनिषद्भाष्यादिग्रंथकल्पकाय नमः ।

८३—श्रीचतुर्दिक्चतुराम्नाय प्रतिष्ठात्रे नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

८४—श्रीमहामतये नमः ।

८५—श्रीद्विसप्ततिमतोच्छेत्रे नमः ।

८६—श्रीसर्वदिग्विजयप्रभवे नमः ।

८७—श्रीकाषायवसनोपेताय नमः ।

८८—श्रीभस्मोद्धूलितविग्रहाय नमः ।

८९—श्रीज्ञानात्मकैकदण्डाढ्याय नमः ।

९०—श्रीकमण्डलुलसत्कराय नमः ।

९१—श्रीगुरुभूमण्डलाचार्याय नमः ।

९२—श्रीभगवत्पादसंज्ञकाय नमः ।

९३—श्रीव्याससंदर्शनप्रीताय नमः ।

९४—श्रीऋष्यशृंगपुरेश्वराय नमः ।

९५—श्रीसौंदर्यलहरीमुख्यबहुस्तोत्रविधायकाय नमः ।

९६—श्रीचतुष्षष्टिकलाभिज्ञाय नमः ।

९७—श्रीब्रह्मराक्षसतोषकाय नमः ।

९८—श्रीमण्डनमिश्राख्यस्वयंभूजयसंनुताय नमः ।

९९—श्रीतोटकाचार्यसंपूज्याय नमः ।

१००—श्रीपद्मपादार्चितांघ्रिकाय नमः ।

१०१—श्रीहस्तामलकयोगीन्द्रब्रह्मज्ञानप्रदायकाय नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१०२-श्रीसुरेश्वराख्यसच्छिष्यसंन्यासाश्रमदायकाय नमः ।

१०३—श्रीनृसिंहभक्ताय नमः ।

१०४—श्रीसद्रत्नगर्भहेरम्बपूजकाय नमः ।

१०५—श्रीव्याख्यासिंहासनाधीशाय नमः ।

१०६—श्रीजगत्पूज्याय नमः ।

१०७—श्रीजगद्गुरवे नमः ।

१०८—श्रीसर्वलोकगुरवे नमः ।

## श्रीगुरुवर्गवन्दना

कावेरीतट-संजातं कावेरीव सुनिर्मलम् ।
शंकरज्येष्ठ-शिष्यं तं गुणज्येष्ठं नमाम्यहम् ॥ १ ॥
नृसिंहसाधकं वन्दे सनन्दनयतीश्वरम् ।
गुरुस्नेहाभिषिक्तो यः पद्मपादाभिधां गतः ॥ २ ॥
योगैश्वर्यबलाद् यो हि मृते वत्से प्रविश्य च ।
अजीवयन् मृतं बालं तस्मै नित्यं नमोनमः ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हस्तामलकवद् यस्य ब्रह्मज्ञानमबाधितम् ।
तं हस्तामलकाचार्यं भूयो भूयो नतोऽस्म्यहम् ॥ ४ ॥
श्रीगुरोः सेवनेनैव दिव्यज्ञान-समन्वितः ।
ललिताक्षर-पद्येन गुरोः स्तोत्रमथाकरोत् ॥ ५ ॥
तोटकच्छन्दसा स्तोत्रं कृत्वा गुरुप्रसादकः ।
तोटकाख्यां गतो यो वै तस्मै नित्यं नमोनमः ॥ ६ ॥
वादयुद्धच्छलेनैव श्रीगुरोर्गौरवं व्यधात् ।
शास्त्रतत्त्वरहस्यज्ञं तं नमामि सुरेश्वरम् ॥ ७ ॥
भाष्य-वार्त्तिककारो यो वेद-वेदान्त-पारगः ।
तमहं सततं वन्दे सुरेश्वरयतीश्वरम् ॥ ८ =
शंकराचार्य्य-सच्छिष्याः पद्मपादादि-संज्ञकाः ।
प्रीयन्तां गुरवो नित्यं हृषीकेशाख्य-भिक्षुके ॥ ९ ॥
तेषां कृपाकणाभिक्षुः ज्ञानामृतवुभुक्षुकः ।
श्रीगुरून् सततं नौति हृषीकेशाख्यभिक्षुकः ॥ १० ॥

इति श्रीजगन्नाथाश्रमपूज्यपादशिष्य-श्रीहृषीकेशाश्रम
विरचिता श्रीगुरुवर्गवन्दना समाप्ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri